# चिकित्सा सूत्राणि

## ज्वरः

लङ्घनं स्वेदनं कालो यवाग्वस्तिक्तको रसः ।
पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे ।।

(च.चि. ३/१४२)

ज्वरादौ लङ्घनं शस्तं ज्वरमध्ये तु पाचनम्।
ज्वरान्ते रेचनं प्रोक्तमेतत्ज्वचिकित्सितम्।।

(यो.र.ज्वर चिकित्सा.१)

## धातुगत ज्वर

सेकप्रदेहौ रक्तस्थे तथा संशमनानि च।
विरेचनं सोपवासं मांसमेदः स्थिते हितम्।।
अस्थिमज्जगते देया निरूहाः सानुवासनाः।

(च.चि.३/३१६)

## रक्तपित्तम्

अक्षीणबलमांसस्य रक्तपित्तं यदश्नतः ।
तद्दोषदुष्टमुत्क्लिष्टं नादौ स्तम्भनमर्हति।।

(च.चि. ४/२५)

## लङ्धनं **for** रक्तपित्तं

प्रायेण हि समुत्क्लिष्टमामदोषाच्छरीरिणाम्।
वृद्धिं प्रयाति पित्तासृक्तस्मात्तल्लङ्घ्यमादितः।।
मार्गौ दोषानुबन्धं च निदानं प्रसमीक्ष्य च ।
लङ्घनं रक्तपितादौ तर्पणं वा प्रयोजयेत् ।।

(च.चि. ४/२९,३०)

## शोधनं **for** रक्तपित्तं

अक्षीणबलमांसस्य यस्य सन्तर्पणोत्थितम् ।
बहुदोषं बलवतो रक्तपित्तं शरीरिणः ।।

काले संशोधनार्हस्य तद्वरेन्निरुपद्रवम् ।
विरेचनेनोर्ध्वभागमधोगं वमनेन च ।।

(च.चि. ४/५५,५६)

## गुल्मम्

स्नेहपानं हितं गुल्मे विशेषेणोर्ध्वनाभिजे ।
पक्वाशयगते बस्तिरुभयं जठराश्रये ।।

(च.चि. ५/२४)

## रक्तगुल्मं

रौधिरस्य तु गुल्मस्य गर्भकालव्यतिक्रमे ।
स्निग्धस्विन्नशरीरायै दद्यात् स्नेहविरेचनम् ।।

(च.चि. ५/१७२)

## प्रमेहः

स्थूलः प्रमेही बलवानिहैकः कृशस्तथैकः परिदुर्बलश्च ।
संबृंहणं तत्र कृशस्य कार्यं संशोधनं दोषबलाधिकस्य ।।

(च.चि. ६/१५)

## विशेष चिकित्सा for प्रमेह

संशोधनोल्लेखनलङ्घनानि काले प्रयुक्तानि कफप्रमेहान्।
जयन्तिपित्तप्रभवान् विरेकः संतर्पणः संशमनो विधिश्च।।

(च.चि.६/२५)

## कुष्ठः

वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोरेषु मोक्षो रक्तस्य विरेचनं चाग्रे ।।

(च.चि. ७/३९)

षष्ठे मासे सिरामोक्षं प्रतिमासं विरेचनम्।
प्रतिपक्षं च वमनं कुष्ठे लेपं त्र्यहाच्चरेत्।।

(भै.र.कुष्ठ.५४)

## श्वित्रम्

श्वित्रे स्रंसनमग्रयं यं मलपूयरस इष्यते सगुडः।
तं पीत्वा सुस्निग्धो यथाबलं सूर्यपादसंतापम्।।
संसेवेत विरिक्तस्त्र्यहं पिपासुः पिबेत् पेयाम्।।

(च.चि.७/१६३)

## राजयक्ष्म

पीनसे स्वेदमभ्यङ्गं धूममालेपनानि च ।
परिषेकावगाहांश्च यावकं वाट्यमेव च ।।
लवणाम्लकटूष्णांश्च रसान् स्नेहोपबृंहितान् ।
लावतित्तिरदक्षाणां वर्तकानां च कल्पयेत् ।।
सपिप्पलीकं सयवं सकुलत्थं सनागरम् ।
दाडिमामलकोपेतं स्निग्धमाजं रसं पिबेत् ।।
तेन षड्विनिवर्तन्ते विकाराः पीनसादयः।
मूलकानां कुलत्थानां यूषैर्वा सूपकल्पितैः।।

(च.चि. ८/६५ -६८)

## शोधनं for राजयक्ष्मा

दोषाधिकानां वमनं शस्यते सविरेचनम्।
स्नेहस्वेदोपपन्नानां सस्नेहं यन्न कर्शनम्।।
शोषीमुञ्चति गात्राणि पुरीषस्रंसनादपि।
अबलापेक्षिणीं मात्रां किं पुनर्यो विरिच्यते।।

(च.चि. ८/८७ / ८८)

## उन्मादः

उन्मादे वातजे पूर्वे स्नेहपानं विशेषवित्।
कुर्याद् आवृतमार्गे तु सस्नेहं मृदुशोधनम्।।
कफपित्तोद्भवे अपि आदौ वमनं सविरेचनम्।
स्निग्धस्विन्नस्य कर्तव्यं शद्धे संसर्जनक्रमः।।
निरूहं स्नेहबस्तिं च शिरसश्च विरेचनम्।
ततः कुर्याद् यथादोषं तेषां भूयस्त्वमाचरेत्।।

(च.चि. ९/२५-२७)

## अपस्मारः

तैरावृतानां हृत्स्रोतोमनसां संप्रबोधनम्।
तीक्ष्णैरादौ भिषक् कुर्यात् कर्मभिः वमनादिभिः।।
वातिकं बस्तिभूयिष्ठैः पैत्तं प्रायो विरेचनैः।
श्लेष्मिकं वमनप्रायैः अपस्मारमुपाचरेत्।।

(च.चि. १०/१४,१५)

## अतत्वाभिनिवेशः

स्नेहस्वेदोपपन्नं तं संशोध्यवमनदिभिः।
कृतसंसर्जनं मेध्यैरन्नपानैरुपाचरेत्।।

(च.चि. १०/६१)

## क्षतक्षीणः

उरो मत्वा क्षतं लाक्षां पयसा मधुसंयुताम्।
सद्य एव पिबेज्जीर्णे पयसादद्यात् सशर्करम्।।

(च.चि. ११.१५)

## श्वयथुः

अथामजं लङ्घनपाचनक्रमैविशोधनैः ऊल्बणदोषमादितः।
शिरोगतं शीर्षविरेचनैः अधोविरेचनैः ऊर्ध्वहरैः तथा ऊर्ध्वजम्।।
उपाचरेत् स्नेहभवं विरूक्षणैः प्रकल्पयेत् स्नेहविधिं च रूक्षजे।
विबद्धविद्के अनिलजे निरूहणं घृतं तु पित्तानिलजे सतिक्तकम्।।
पयश्च मूर्च्छारतिदाहतर्षिते विशोधनीये तु समूत्रमिष्यते।
कफोत्थितं क्षारकटूष्णसंयुतैः समूत्रतक्रासवयुक्तिभिर्जयेत्।।

(च.चि. १२.१७,१८)

## उदरम्

सर्वमेवोदरं प्रायो दोषसङ्घातजं मतम्।
तस्मात्रिदोषशमनीं क्रियां सर्वत्र कारयेत्।।

(च.चि.१३/९५)

## जलोदरम्

अपां दोषहराण्यादौ प्रदद्यादुदकोदरे।
मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवन्ति च।।
दीपनीयैः कफघ्नैश्च तमाहारैरुपाचरेत्।
द्रवेभ्यश्चोदकादिभ्यो नियच्छेदनुपूर्वशः।।

(च.चि.१३/९३-९४)

## अर्शस्

स्निग्धशीतं हितं वाते रूक्षशीतं कफानुगे।
चिकित्सितमिदं तस्मात् संप्रधार्य प्रयोजयेत्।।
पित्तश्लेष्माधिकं मत्वा शोधनेनोपपादयेत्।
स्रवणं चाप्युपेक्षेत लङ्घनैर्वा समाचरेत्।।

(च.चि.१४/१७५-१७६)

## ग्रहणी

आमलिङ्घान्वितं दृष्ट्वा सुखोष्णेनाम्बुनोद्धरेत्।
फलानां वा कषायेण पिप्पलीसर्षपैस्तथा।।
लीं पक्वाशयस्थं वा प्यायामं स्राव्यं सदीपनैः।
शरीरानुगते सामे रसे लङ्घनपाचनम्।।

(च.चि.१५/७४-७५)

## पाण्डुः

तत्र पाण्ड्वामयी स्निग्धस्तीक्ष्णैरूर्ध्वानुलोमिकैः।
संशोध्यो मृदुभिस्तिक्तैः कामली तु विरेचनैः।।
ताभ्यां संशुद्धकोष्ठाभ्यां पथ्यान्यन्नानि दापयेत्।
शालीन् सयवगोधूमान् पुराणान् यूषसंहितान्।।
मुद्गाढकीमसूरैश्च जाङ्गलैश्च रसैर्हितैः।
यथादोष विशिष्टं च तयोर्भैषज्यमाचरेत्।।
पञ्चगव्यं महातिक्तकं कलय्ाणकमथापि वा।
स्नेहनार्थं घृतं दद्यात् कामलापाण्डुरोगिणे।।

(च.चि.१६/४०-४३)

वातिके स्नेहभूयिष्ठं, पैतिके तिक्तशीतलम्।
श्र्लेष्मिके कटुतिक्तोष्णं, विमिश्रं सान्निपातिके।। ( च. चि.१६/११६ )

## हिक्का श्वासौ

हिक्का श्वासार्दितं स्निग्धैरादौ स्वेदैरुपाचरेत्।
आक्तं लवणतैलेन नाडिप्रस्तरसंकरैः।।
तैरस्य ग्रथितः श्लेष्मा स्रोतः स्वभिविलीयते।
खानि मार्दवमायान्ति ततो वातानुलोमता।।
यथा अद्रिकृञ्जेषु अर्कांशुतप्तं विष्यन्दते हिमम्।
श्लेष्मा तप्तः स्थिरो देहे स्वेदैर्विष्यन्दते तथा।।
स्विन्नं ज्ञात्वा ततस्तूर्णं भोजयेत् स्निग्धमोदनम्।
मत्स्यानां शूकराणां वा रसै दधि उतरेण वा।।
ततः श्लेष्मणि संवृध्दे वमनं पाययेत्तु तम्।
पिप्पली सैन्धव क्षौद्रयुक्त वाताविरोधि यत्।।

कासिने च्छर्दनं दद्यात् स्वरभङ्गे च बुद्धिमान्।
वातश्लेष्महरैर्युक्तं तमके तु विरेचनम्।।

( च. चि.१७/७१-७५ )

## कासः

## वातज कासः

रूक्षस्यानिलजं कासमादौ स्नेहैरुपाचरेत्।
सर्पिभिः वस्तिभिः पेया यूष रसादिभिः।।
वातघ्नसिध्दैः स्नेहाद्यैः धूमैः लेहैश्च युक्तितः।

( च. चि. १८/३२)

## पित्तज कासः

पैतिके सकफे कासे वमनं सर्पिषा हितम्।

( च. चि. १८/८३)

## कफज कासः

बलिनं वमनैरादौ शोधितं कफकासिनम्।

( च. चि.१८/१०८ )

**क्षतज कासः**

कासमात्ययिकं मत्वा क्षतजं त्वरया जयेत्।
मधुरैः जीवनीयैश्च बलमांसविवर्धनैः।।

( च. चि.१८/१३४ )

**क्षयज कासः**

संपूर्णरूपं क्षयजं दुर्बलस्य विवर्णयेत्।
नवोत्थितं तं बलवतः प्रत्याख्यायाचरेत् क्रियाम्।।
तस्मैः बृंहणमेवादौ कुर्याद् अग्नेश्च दीपनम्।
बहुदोषाय सस्नेहं मृदु दद्यात् विरेचनम्।।

( च. चि. १८/१४९-१५०)

**अतिसारः**

दोषाः सन्निचिता यस्य विदग्ध आहार मूर्च्छिताः।
अतीसाराय कल्पन्ते भूयस्तान् संप्रवर्तयेत् ।।
न तु संग्रहणं देयं पूर्वं आमातिसारिणे।
विबध्यमानाः प्राग्दोषा जनयन्ति आमयान् बहुन् ।।
दण्डकालसक आध्मान ग्रहणी अर्शोगदांस्तथा।
शोथ पाण्डवामय प्लीह कुष्ठ गुल्म उदरज्वरान्।
तस्मात् उपेक्षेत् उत्क्लिष्टान् वर्तमानान् स्वयं मलान्।।
कृच्छ्रां वा वहतां दद्यादभयां संप्रवर्तिनीम्।
तया प्रवाहिते दोषे प्रशाम्यति उदरामयः।
जायते देहलघुता जठराग्निश्च वर्धते।।
प्रमथ्यां मध्यदोषाणां दद्याद्दीपनपाचनीम्।
लङ्घनं चाल्पदोषाणां प्रशस्तं अतिसारिणाम्।।

( च. चि.१९/१४-१९ )

**छर्दिः**

आमाशयोत्वलेशभवाहि सर्वाश्छर्द्योमता लङ्घनमेव तस्मात्।
पाक्कारयेन् मारुतजां विमुच्य संशोधनं वा कफपित्तहारी।।

( च. चि. २०/२०)

**अम्लपित्तम्**

पूर्वं तु वमनं कार्यं पश्चान्मृदु विरेचनम् ।
कृतवान्तिविरेकस्य सुस्निग्धस्य अनुवासनम्।।
स्थापनं चिरोत्थे अस्मिन्देयं दोषाद्यपेक्षया।।

(यो.र.अम्लपित्त चिकित्सा.१६)

## विसर्पः

**कफस्थानगतः**

लङ्घन उल्लेखने शस्ते तिक्तकानां च सेवनम्।
कफस्थानगते सामे रूक्षशीतैः प्रलेपयेत्।।

( च. चि.२१/४४ )

**पित्तस्थानगतः**

पित्तस्थानगते अपि एतत् सामे कुर्यात् चिकित्सितम्।
शोणितस्य अवसेकं च विरेकं च विशेषतः।।

( च. चि.२१/४५ )

**मारुतस्थानगतः**

मारुताशयसंभूते अपि आदितः स्याद् विरूक्षणम्।
रक्तपित्तान्वयऽप्यादौ स्नेहनं न हितं मम्।।

( च. चि.२१/४६ )

वातोल्बणे तिक्तघृतं पैतिके च प्रशस्यते।
लघुदोषे, महादोषे पैतिके स्याद् विरेचनम्।।

( च. चि.२१/४७ )

**शीतपित्त**

शीतपित्ते तु वमनं पटोलारिष्टवासकैः।
त्रिफलापुरकृष्णाभिर्विरेकश्च प्रशस्यते।।
अभ्यङ्गः कटुतैलेन सेकश्चोष्णेन वारिणा।
त्रिफलां क्षौद्रसंयुक्तां खादेच्च नवकार्षिकम्।।

(भा.प्र.५५/७-८)

## उदावर्तम्

तं तैलं शीतज्वरनाशनाक्तं स्वेदैः यथोक्तैः प्रविलीनदोषम्।
उपाचरेत् वर्ति निरूहबस्ति स्नेहै विरेक अनुलोमन अन्नैः।।

( च. चि.२६/११ )

## ऊरुस्तम्भः

तस्य संशमनं नित्यं क्षपणं शोषणं तथा।
युक्ति अपेक्षी भिषक् कुर्यात् अधिकत्वात् कफामयोः।।

( च. चि.२७/२५ )

श्लेष्मणः क्षपणं यत्स्याद् न च मारुतमावहेत्।
तत् सर्वं सर्वदा कार्यं ऊरुस्तम्भस्य भेषजम्।।
शरीरं बलमग्निं च कार्यैषा रक्षता क्रिया।।

( च. चि.२७/६१ )

## वातव्याधिः

केवलं निरुपस्तम्भमादौ स्नेहैरुपाचरेत्।
वायुं सर्पिर्वसातैलमज्जपानैर्नरं ततः।।
स्नेहक्लान्तं समाश्वास्य पेयाभिः स्नेहयेत् पुनः।
यूषैर्ग्राम्याम्बुजानूपरसैर्वा स्नेहसंयुतैः।।
पायसैः कृशरैः साम्ललवणैरनुवासनैः।
नावनैस्तर्पणैश्चान्नैः .............................

(च.चि.२८/७५-७७)

## पक्षाघात

स्वेदनं स्नेहसंयुक्तं पक्षाघाते विरेचनम्।

(च.चि.२८/१००)

## गृध्रसी

अन्तराकण्डरागुल्फं सिरा बस्त्यग्निकर्म च।
गृध्रसीषु प्रयुञ्जीत................................

(च.चि.२८/१०१)

## अर्दित

अर्दिते नावनं मूर्ध्नि तैलं तर्पणमेव च।
नाडीस्वेदोपनाहश्चापि आनूपपिशितैर्हिताः।।

(च.चि.२८/९९)

## वातरक्तम्

विरेच्यः स्नेहयित्वा आदौ स्नेहयुक्तैर्विरेचतैः।
रूक्षैर्वा मृदुभिः शस्तमसृक् बस्तिकर्म च।।
सेकं अभ्यङ्ग प्रदेह अन्नस्नेहा प्रायो अविदाहिनः।
वातरक्ते प्रशस्यन्ते....................

( च. चि.२९ )

## उत्थान वातरक्तम्

बाह्य आलेपनं अभ्यङ्ग परिषेक उपनाहैनः।

( च. चि.२९ )

## गम्भीर वातरक्तम्

विरेक आस्थापनं स्नेहपानैः गम्भीरमाचरेत्।

( च. चि.२९ )

# मूत्रकृच्छ्रम्

## वातजम्

अभ्यञ्जनस्नेहनिरूहबस्तिस्नेह उपनाहोत्तरबस्तिसेकान्।
स्थिरादिभिः वातहरैश्च सिद्धान्दद्यात् रसांश्च अनिलमूत्रकृच्छ्रे।।

(च.चि.२६ |४५)

## पित्तजम्

सेकावगाहाः शिशिराः प्रदेहा ग्रैष्मो विधिर्बस्तिपयोविरेकाः।
द्राक्षाविदारीक्षुरसैर्घृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्याः।।

(च.चि.२६ |४९)

**कफजम्**

क्षारोष्णतीक्ष्णौषधमन्नपानानां स्वेदो यवान्नं वमनं निरूहाः।
तक्रं सतिक्तौषधसिद्ध तैलमभ्यङ्गपानं कफमूत्रकृच्छ्रे।।

(च.चि.२६।५४)

**सन्निपातजम्**

सर्वं त्रिदोषप्रभवे तु वायोः स्थानानुपूर्व्या प्रसमीक्ष्य कार्यम्।
त्रिभ्यो धिके प्राग्वमनं कफे स्यात् पित्ते विरेकः पवने तु बस्तिः।।

(च.चि.२६/५८)

## हृद्रोगः

**वातजः**

तैलं ससौवीरकमस्तुतक्रं वाते प्रपेयं लवणं सुखोष्णम्।
मूत्राम्बुसिद्धं लवणैश्च तैलं आनाहगुल्मार्तिहृदामयघ्नम्।।

(च.चि.२६/७१)

**पित्तजः**

शीताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे।
द्राक्षासिताक्षौद्रपरूषकैःस्यात् शुद्धे तु पित्तापहं अन्नपानम्।।

(च.चि.२६/९०)

**कफजः**

स्विन्नस्य वान्तस्य विलङ्घितस्य क्रिया कफघ्नी कफमर्मरोगे।
कौलत्थधान्यैश्च रसैर्यवान्नं पानानि तीक्ष्णानि च शङ्कराणि।।

(च.चि.२६/९६)

**सन्निपातजः**

त्रिदोषजे लङ्घनमादितः स्यादन्नं च सर्वेषु हितं विधेयम्।
हीनातिमध्यत्वमवेक्ष्य चैव कार्यं त्रयाणामपि कर्म शस्तम्।।

(च.चि.२६/१००)

## योनिव्यापत्

स्निग्धस्विन्नां तथा योनिं दुःस्थितां स्थापयेत्पुनः।
पाणिना नमयेत्जिह्मां संवृतां वर्धयेत् पुनः।।
प्रवेशयेत् निसृतां च विवृतां परिवर्तयेत्।।

(च.चि.३०/४३-४४)

## आध्मानः

आध्मानेष्वपतर्पणं पाणिताप फलवर्तिक्रिया।
पाचनीय दीपनीय बस्तिभिरुपाचरेत्।।

(सु.चि)

आध्माने लंघनंपूर्वं दीपनं पाचनं ततः।
फलवर्ति क्रियां कुर्यात् बस्तिकर्म च शोधनम्।।

(भा.प्र)

## प्रत्याध्मानः

प्रत्याध्माने छर्दनापतर्पण दीपनानि कुर्यात्।।

(सु.चि)

## उपदंशः

स्निग्धस्विन्नस्य तेष्वादौ ध्वजमध्ये सिराव्यधः।
जलौकापातनं वा स्यादूर्ध्वाधः शोधनं तथा।।
सद्योऽपहृतदोषस्य रुक्शोफावुपशाम्यतः।
पाको रक्ष्यः प्रयत्नेन शिस्न क्षयकरश्च सः।।

(यो.रत्ना.१०–११)

## श्लीपदम्ः

लंघनलेपनस्वेदरेचनैः रक्तसेचनैः।
प्रायः लेष्महरैरुष्णैः श्लीपदं समुपाचरेत्।।

(यो.रत्ना.९ श्लोकः)

**<u>शूलः</u>**

वमनं लंघनं स्वेदः पाचनं फलवर्तयः।
क्षाराः चूर्णं च गुटिकाः शस्यन्ते शूलनाशना।।

(सु.उ.४२)

गुल्मावस्था क्रिया कार्याः यथावत् सर्वशूलिनाम्।।

(यो.रत्ना)

**<u>परिणाम शूलः</u>**

लंघनं प्रथमं कुर्यात् वमनं च विरेचनम्।
बस्तिकर्म परं चात्र पक्तिशूलोप शान्तये।।

(यो.रत्ना.१६zश्लोकः)

वातजं स्नेहयोगेन पित्तजं रेचनादिना।
कफजं वमनाद्यैश्च पक्तिशूलमुपाचरेत्।।
द्वन्द्वजं स्नेहयोगेन तन्त्रियोगेन सर्वजम्।

(यो.रत्ना.१७ श्लोकः)

**<u>अन्नद्रव शूलः</u>**

पित्तान्तं वमनं कृत्वा कफान्तं च विरेचनम्।
आमपक्वाशये शुद्धे गच्छेत् अन्नद्रवः शमम्।। (भै.रत्नावलि)

**<u>मृद्भक्षणजन्य पाण्डुः</u>**

मृदं निर्वापयेत् कायात्तीक्ष्णैः संशोधनैः पुरः।
बलादानानि सर्पींषि शुद्धकोष्ठे तु योजयेत्।।

(अ.हृ.चि.१६/३५)

**कामलाः–**

कामलायां तु पित्तघ्नं पाण्डुरोगाविरोधि यत्।

(अ.हृ.चि.१६/४०)

रेचनं कामलार्तस्य स्निग्धस्यादो प्रयोजयेत्।
ततः प्रशमनी कार्या क्रिया वैद्येन जानता।।

(भै.रत्नावलि)

तिलपिष्टनिभं यस्तु वर्चः सृजति कामली।
श्लेष्मणारुद्धमार्गं तं पित्तं कफहरैर्जयेत्।।

(च.चि.१६/१२४)

मूत्रवेगनिरोधज उदावर्त चिकित्साः–
स्वेदावगाहाभ्यशन् सर्पीषांश्चावपीडकाः।
मूत्रे प्रतिहते कुर्यात् त्रिविधं बस्तिकर्म च।।

(च.चि)

**अवपीडकस्नेहपानम्ः–**

अवपीडको बहुमात्रप्रयोगः मात्राधिकत्वेन हि।
भेषजं दोषान् पीडयतीति कृत्वा।।

(च.चि)

**प्लीहोदरम्ः–**

स्नेहस्वेदं विरेकं च निरूहमनुवासनम्।
समीक्ष्य कारयेत् बाहौ वामे वा व्यधयेत् सिराम्।।

(च.चि.१३/७७)

**यकृतोदरम्ः–**

यकृति प्लीहवत् सर्वं तुल्यत्वात् भेषजं श्रुतम्।।

(च.चि.१३/८८)

**विषप्रयोगः उदरम्ः–**

अक्रियायां द्रुवो मृत्युः क्रियायां संशयं भवेत्।
एवमाख्याय तस्येतमनु~ तः सुहृत्गणैः।।
पानभोजनसंयुक्तं विषमस्मै प्रयोजयेत्।।

(च.चि.१३/१७७)

**अजीर्णम्ः–**

लंघनं कार्यमामे तु विष्टब्धे स्वेदनं भृशम्।
विदग्धे वमनं यद्वा यथावस्थं हितं भवेत्।।

(अ.सं.सू.११/३४)

तत्रामे वमनं कार्यं विदग्धे लंघनं हितम्।
विष्टब्धे स्वेदनं शस्तम्।

(यो.रत्ना.५६ श्लोकः)

**कृमिः–**

तत्र सर्वकृमीणां अपकर्षणमेव कार्यः ततः प्रकृतिविघातः
अनन्तरं निदानोक्तानां भावानां अनुप्सेवनमिति ।।

(च. नि)

**मूत्राघातः–**

स्नेहस्वेदोपपन्नानां हितम् तेषु विरेचनम्।
ततः संशुद्धदेहानां हिताश्चोत्तरबस्तयः।।

(सु.उ.५८/५०)

**प्रवाहिकाः–**

तासामतीसारवदादिशेच्च लिंगम् क्रमं चामविपक्वतांच।

(सु.उ.४०/१४०)

## अश्मरीः–

**क्रिया हिता साऽ श्मरीशर्कराभ्यां कृच्छ्रे यथैवेहं कफानिलाभ्याम्।**
**कार्याऽश्मरीभेदनपातनाय विशेषयुक्तं श्रुणु कर्म सिद्धम्॥**

(च.चि.२६/५९)

अष्मरी दारुणो व्याधिरन्तकप्रतिमो मतः।
तरुणो भेषजैः साध्य प्रवृध्दश्छेदमर्हति।।
तस्य पूर्वेषु रूपेषु स्नाहादिक्रम इष्यते।।

(अ.हृ. चि ११)

## आमवातंः–

नीते निरामतां सामे स्वेदलङ्घन पाचनैः।
रूक्षैष्च आलेप सेकाध्यैः कुर्यात् केवल वातनुत् ।।

(अ.हृ. चि २२)

## शीतपित्त, उदर्द, कोठः–

अभ्यङ्गः कटुतैलेन स्वदष्चोष्नेन वारिणा।
तथा SSशु वमनं कार्यं पठोलारिष्टवासकैः।।

(यो. र)